## अध्याय :- २२ chapter-22

नारद उवाच ।।[१]

एवं विप्रकृता देवा महेन्द्रसहितास्तदा ।।
ययुः स्वायंभुवं धाम मर्करूपमुपाश्रिताः ।। १

ततश्च विस्मितो ब्रह्मा प्राह तान्सुरपुंगवान् ।।
स्वरूपेणह तिष्ठध्वं नात्र वस्तारकाद्भयम् ।। २

ततो देवाः[२] स्वरूपस्थाः प्रम्लानवदनांबुजाः ।।
तुष्टुवुः प्रणताः सर्वे पितरं पुत्रका यथा ।। ३

नमो जगत्प्रसूत्यै ते हेतवे पालकाय च ।।
संहर्त्रे च नमस्तुभ्यं तिस्त्रोऽवस्थास्तव प्रभो ।। ४

त्वमपः[३] प्रथमं सृष्ट्वा तासु वीर्यमवासृजः[४] ।।
तदण्डम भवद्धैमं यस्मिल्लोकाश्चराचराः ।। ५

[५] वेदेष्वाहुर्विराट्रूपं त्वामेकरूपमीदृशम् ।।
पातालं पादमूलं च पार्ष्णिपादे रसातलम् ।। ६

महातलं[६] चास्य गुलफौ जंघे चापि तलातलं ।।
सुतलं जानुनी चास्य ऊरू च वितलातले ।। ७

---

| | | | | | |
|---|---|---|---|---|---|
| १ | ब. | श्री नारद उ० ।। | २ | ब. | देवा |
| ३ | अ. | त्वमापः | ४ | अ. | सृजत् |
| ५ | अ. | देवे | ६ | ब. | तले |

महीतलं च जघनं नाभिश्चास्य नभस्तलम् ।।
ज्योतिः पदयुरः स्थानं स्वर्लोको बाहुरुच्यते ।। ८

ग्रीवा महश्चवदनं जनलोकः[1] प्रकीर्त्यतिह्य ।।
ललाटं च तपोलोकः शीर्षं सत्यमुदात्द्रुतम् ।। ९

चन्द्रसूर्यौ च नयने दिशः श्रोत्रे नासिकाश्विनौ ।।
आत्मानं ब्रह्मरंध्रस्थमाहुस्त्वा वेदवादिनः ।। १०

एवं ये ते विराड्रूपं संस्मरंत उपासते ।।
जन्मबन्धविनिर्मुक्ता यांति त्वां परमंपदम् ।। ११

एवं स्थूलं प्राणिमध्यं च सूक्ष्मं भावे भावे भावितं[2] त्वां गृणंति ।।
सर्वत्रस्थं त्वामतः प्राहुर्वेदास्तस्मै तुभ्यं पद्मज इद्धिधेम ।। १२

एवं स्तुतो विरंचिस्तु कृपयाभिपरिप्लुतः ।।
जानन्नपि तदा प्राह तेषामाश्वास हेतवे ।। १३

सर्वे भवन्तो दुःखार्ताः परिम्लानमुखांबुजाः ।।
भ्रष्टायुधास्तथा कस्माद्भ्रष्टा भरणवाससः ।। १४

---

९ १ अ. ब. जनो
२ अ. भाविनां

ममैवेयं कृतिर्देवा भवतां यद्विडम्बनां ।।
यद्विराज शरीरे मे भवन्तौ वाहु संज्ञकाः।। १५

यद्यद्विभूतिमत्स्त्वं धार्मिकं चोर्जितं महत् ।।
तत्रासीद्बाहुनाशो[1] मे बाहुस्थाने च ते मम ।। १६

तन्नूनं मम भग्नौ च बाहू तेन दुरात्मना ।।
येन चोपहृतं देवास्तन्ममाख्यातुमर्हथ ।। १७

देवा ऊचुः ।।
यो सौ वजांग्रतनयस्त्वया देत्तवरः प्रभो ।।
भृशं विप्रकृतास्तेन तत्त्वं जानासि तत्त्वतः ।। १८

यत्तन्महीसमुद्रस्य तटं शार्विकं तीर्थकम् ।।
तदाक्रम्य कृतं तेन मरुभूमिसमं प्रभो ।। १९

ऋद्धयः सर्वदेवानां गृहीतास्तेन सर्वतः[2] ।।
महाभूतस्वरूपेण [3]स एव च जगत्पतिः ।। २०

चंद्र[4]सूर्यौ ग्रहास्तारा यच्चान्य देव पक्षतः ।।
तच्च सर्वं निराकृत्य स्थापितौ दैत्यपक्षकः ।। २१

---

१ तन्नाशाद्बाहुनाशो अ. ब. पाठः ।

२ अ. शः

३ अ. प्रतौ जगत्पतिः स एव च इति पाठः स्यात् ।।

४ ब. सूर्या

वयं च विधूतास्तेन बहूपद्रवितास्तथा ।।
विष्णोः प्रसादान्मुक्ताश्च कथंचिदिव कष्टतः ।। २२

तद्वयं शरणं प्राप्ताः पीडिताः क्षुतृषार्दिताः ।।
धर्मरक्षाकराश्चेति संचिंत्य त्रातुमर्हसि ।। २३

[1]इत्युक्तः स्वात्मभूर्देवः सुरैर्दैत्य विचेष्टितम् ।।
सुरानुवाच भगवानतः संचिंत्य तत्वतः ।। २४

अवध्यस्तारको दैत्यः सर्वैरपि सुरासुरैः ।।
यस्य वध्यश्च नाद्यापि स जातो भगवान्पुनः ।। २५

मया च वरदानेन च्छन्दयित्वा निवारितः ।। २६

तपसा स हि दीप्तो भूत्त्रैलोक्य दहनात्मकः ।।
सच वव्रे वधं दैत्यः शिशुतः[2] सप्तवासरात्[3] ।। २७

स च सप्तदिनो बालः शंकराद्यो भविष्यति ।।
तारकस्य च वीरस्य वधकर्ता भविष्यति ।। २८

---

१ अ. 'इत्युक्तवात भूर्देवः' इति पाठः स्यात् ।
२ अ. शिशुना ब. शिश्रुतः ।
३ ब. वासरान्

सतीनामा तु या देवी विनष्टा दक्षहेलया ।।
सा भविष्यति कल्याणि हिमाचल शरीरजा ।। २९

शंकरस्य च तस्याश्च यत्नः कार्यः समागमे ।।
महमप्यस्य कार्यस्य शेषां कर्ता न संशयः ।। ३०

इत्युक्ता स्त्रिदशास्तेन साक्षात्कमलयोनिना ।।
जग्मुमेरुं प्रणम्येशं मर्करूपेण संवृताः[१] ।। ३१

२ * ततो गतेषु देवेषु ब्रह्मा लोकपितामहः ।।
निशांसस्मार भगवान्स्वां तनुं पूर्वसंभवाम् ।। ३२

ततो भगवती रात्रिरूपतस्थे पितामहम् ।।
तां विविक्ते समालोक्य तथोवाच विभावरीम् ।। ३३

विभावरी महत्कार्यं विबुधानामुपस्थितम् ।।
तत्कर्तव्यं त्वया देवि शृणु कार्यस्य निश्चयम् ।। ३४

तारकोनाम दैत्येंद्रः सुरकेतुर निर्ज्जितः ।।
तस्याभावाय भगवांजनयिष्यति यं शिवः[३] ।। ३५

---

१ ब. तः

२ * After the sloka No.31 there is written in the M.S.S.A'

इति श्री स्कंदपुराणे कुमारिकाखंडे सुराश्वासनं ।।

The sloka 32 begins with - नारद उवाच which is not appear in the P.W.

३ अ. ब. इश्वरः इति स्यात् ।।

सुतः स भविता तस्य तारकस्यांतकारकः ।।
अहं त्वादौ यदा जातस्तदापश्यं पुरःस्थितम् ।। ३६

अर्धनारीश्वरं देवं व्याप्य विश्वमवस्थितम् ।
दृष्ट्वा[1] तम ध्रुवं देवं भजस्वेति च भक्तितः ।। ३७

ततो नारी पृथग्जाता पुरुषाश्च तथा पृथक् ।।
तस्याश्चैवांशजाः सर्वाः स्त्रियस्त्रिभुवनेस्मृताः ।। ३८

एकादश च रुद्राश्च पुरुषास्तस्य चांशजाः ।।
तां नारीमहमालोक्य पुत्रं दक्षमथाब्रवम् ।। ३९

भजस्व पुत्रीं जगती[2] ममापि च तवापि च ।।
पुंदुःखनकात्रात्री पुत्रीत्वे भाविनीत्वियम् ।। ४०

एवमुक्तो मयादक्षः पुत्रीत्वे परिकल्पिताम् ।।
रुद्राय दत्तवान्भक्तया नाम दत्वा सतीमियत्[3] ।। ४१

ततः काले च कस्मिंश्चिदवमेने च तां पिता ।।
मुमूर्षुः पापसंकल्पो दुरात्मा कुलकुज्जलः ।। ४२

---

१ अ. ब. श्रुत्वा
२ अ. ब. जगतां
३ अ. "च" पाठः

ये रुद्रं नैव मन्यंते ते स्फुटं कुलकज्जलाः ।।
पिशाचास्ते दुरात्मानो भवंति ब्रह्म राक्षसाः ।। ४३

अवमानेन तस्यापि यथा देवी जहौ तनुम् ।।
यथा यज्ञः स च ध्वस्तो भवेन विदितं हि ते ।। ४४

अधुना हिमशैलस्य भवित्री दुहिता च सा ।।
महेश्वरं पतिं सा च पुनः प्राप्स्यति निश्चितम् ।। ४५

तदिदं च त्वया कार्यं मेनागर्भे[1] प्रविश्य च ।।
तस्याश्छविं कुरु कृष्णां यथा कालीभवेतु[2] सा ।। ४६

यदा रुद्रोपहसिता तपस्तप्स्यति सा महत् ।।
समाप्तनियमा देवी यदा चोग्रा भविष्यति ।। ४७

स्वयमेव यदा[3] रूपं सुगौरं प्रतिपत्स्यते ।।
विरहेण हरश्वास्य मत्वा शून्यं जगत्त्रयम् ।। ४८

तस्यैव[4] हिमशैलस्य कंदरे सिद्धसेविते ।।
प्रतीक्षमाणस्तां देवीमुग्रं संतप्स्यते तपः ।। ४९

---

१ अ. ब. गर्भ
२ अ. भवेत
३ अ. तदा
४ अ. व

तयोः सुतप्ततपसोर्भविता यो महान्धृतिः[1] ।।
भविष्यति स दैत्यस्य तारकस्य निवारकः ।। ५०

तपसे हि विना नास्ति सिद्धिः कुत्रापि शोभने[2] ।।
सर्वासां कर्म सिद्धीनां मूलं हि तप उच्यते ।। ५१

त्वयापि दानवो देवी देहनिर्गतया तदा ।।
चंडमुंड पुरोगाश्च हंतव्या लोकदुर्जयाः ।। ५२

यस्माच्चंडं [illegible] च मुंडं च त्वं देवि निहनिष्यसि ।।
चामुंडेति ततो[3] लोके ख्याता देवि भविष्यसि ।। ५३

ततस्त्वां वरदे देवि लोकः संपूजयिष्यति ।।
भेदैर्बहुविधाकारैः सर्वगां कामसाधनीम् ।। ५४

ॐकारवक्त्रां गायत्रीं त्वामर्चंति द्विजोत्तमाः ।।
ऊर्जितां बलदां वापि राजानः सुमहाबलाः ।। ५५

[illegible] वैश्यास्त्वां भूतिमित्येव शिवां शूद्रास्तथा शुभे ।।
क्षांतिर्मुनीनाम क्षोभ्या दया नियमिनामपि ।। ५६

---

१ "महाव्रतः" अ. ब. पाठः ।
२ ब. शोभिते
३ अ. तदा

त्वं मयोपायस्न्दोहा नीतिर्नय विसर्पिणाम् ।।
परिस्थितिस्त्वमर्थानां त्वमहो प्राणिकामता[१] ।। ५७

त्वं युक्तः[२] सर्व भूतानां त्वं गतिः[३] सर्वदेहिनाम् ।।
रतिस्त्वं रतिचित्तानां प्रीतिस्त्वं त्दधदर्शिनाम् ।। ५८

त्वं क्रांतिः[४] शुभरूपाणां त्वं शांतिः शुभकर्मिणाम् ।।
त्वं भ्रांतिर्मूढ चित्तानां त्वं फलं क्रतु[५]याजिनाम् ।। ५९

जलधीनां महावेला त्वं चलीता विलासिनाम् ।।
संभूतिस्त्वं पदार्थानां स्थितिस्त्वं लोकपालिनी ।। ६०

त्वं कालरात्रिर्निः शेषाभुवनाव[६]लिनाशिनी ।।
प्रिय कंठ ग्रहानन्ददायिनी त्वं विभावरी ।। ६१

प्रसीद प्रणतानस्मान्सौम्यदृष्टया विलोक्य ।। ६२

इति स्तुवंतो ये देवि पूजयिष्यंति त्वां शुभे ।।
ते सर्वकामानाप्स्यंति नियता नात्र संशयः ।। ६३

---

१ ब. मिता
२ अ. ब. युक्तिः
३ अ. ~~स्तुतिः~~ मतिः
४ ब. क्रांति
५ अ. यायिनां
६ अ. वलिशालिनी
ब. बलिनाशिनी

इत्युक्ता तु निशादेवी तथेत्युक्ता कृतांजलिः ।।
जगाम त्वरिता पूर्व[1] गृहं हिमगिरेर्महत् ।। ६४

तत्राऽऽसीनां महाहर्म्ये रत्नभित्ति समाश्रये ।।
ददर्श मेनामापांडुच्छ विवक्त्रसरोरुहाम् ।। ६५

किंचिच्छ्याम मुखोदग्रस्तन् भागावनामिताम् ।।
महौषधि गणाबद्ध मंत्र राजनिषेविताम् ।। ६६

ततः किंचित्प्रमिलिते मेनाने त्रांबुजद्वये ।।
आविवेश मुखं[2] रात्रिर्ब्रह्मणो वचनात्तदा ।। ६७

जन्मदाया जगन्मातुः क्रमेण जठरांतरम् ।।
अरंजयच्छिविं देव्या गृहमातुर्विभावरी ।। ६८

ततो जगन्मंगलदा मेना हिमगिरेः प्रिया ।।
ब्राह्मे मुहूर्ते सुभगे प्रासूयत शुभाननाम् ।। ६९

तस्यां तु जायमानायां जंतवः स्थाणु जंगमाः ।।
अभवन्सुखिनः सर्वे सर्वलोक निवासिनः ।। ७०

अभवत्क्रूरसत्त्वानां चेतः शांत च देहिनाम् ।।
ज्योतिषामपि तेजस्त्वम भवत्सुतरां तदा ।। ७१

[3]वनाश्रिताश्चौषधयः स्वादवंति फलानि च ।।
गंधवंति च माल्यानि विमलं च नभोऽभवत् ।। ७२

---

१ अ. प्रतौ नास्ति ।
२ अ. मुखा
३ ब. धनाश्रिता

मारुतश्च सुखस्पर्शो दिशश्च सुमनोहराः ।।
विस्मृतानि च शास्त्राणि प्रादुर्भावं प्रपेदिरे ।। ७३

प्रभावस्तीर्थ मुख्यानां तदा पुण्यतमो भवत् ।।
सत्ये धर्मे चाध्ययने यज्ञे[1] दाने तपस्यपि ।। ७४

सर्वेषामभवच्छ्रद्धा जन्मकाले गुहारणेः ।।
अंतरिक्षेमराश्चापि प्रहर्षोत्फुल्ललोचनाः ।। ७५

हरिब्रह्म महेंद्रार्कवायुवह्नि पुरोगमाः ।।
पुष्पवृष्टिं प्रमुमुचुस्तस्मिन्मेनागृहे शुभे ।। ७६

मेरु प्रभुतयश्चापि मूर्तिमंता महानगाः ।।
तस्मिन्महोत्सवे प्राप्ता वीरकास्तोय शोभिताः ।। ७७

सागराः सरितश्चैव समाजग्मुश्च सर्वशः ।। ७८

हिमशैलो भवल्लोके तदा सर्वैश्चरा चरैः ।।
सेव्यश्चाप्य भिगम्यश्च पूजनीयश्च भारत ।। ७९

अनुभूयोत्सवं ते च जग्मुः स्वानालयांस्तदा ।। ८०

[2] इति श्री स्कांदे.....पार्वती जन्मवर्णनं नाम द्वाविंशो ध्यायः ।।

---

१ अ. ब. "यज्ञ"
२ अ. इति श्री स्कंद पुराणे कुमारिका खंडे कुमारेश्वर माहात्म्ये पार्वतिजन्म।
ब. इति श्री स्कंद पुराणे कुमारिका खंडे पार्वतिजन्म द्वाविंशोध्यायः ।।२२